योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२३

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

इति संकथनं कृत्वा तस्यां निशि वराङ्गने ।

सुप्ते परिजने नूनमथान्तःपुरमण्डपे ।। १

दृढाखिलार्गलद्वारगवाक्षे दक्षचेतसि ।

पुष्पप्रकरनिष्ठयूतमांसलामोदमन्थरे ।। २

अम्लानमालावसनशवपार्श्वासनस्थिते ।

सकलामलपूर्णेन्दुवदनद्योतितास्पदे ।। ३

समाथिस्थानकं गत्वा तस्थतुर्निश्चलाङ्गिके ।

रत्नस्तम्भादिवोत्कीर्णे चित्रे भित्ताविवार्पिते ।। ४

सर्वास्तत्यजतुश्चिन्ताः संकोचं समुपागते ।

दिवसान्त इवाब्जिन्यौ प्रसृतामोदलेखिके ।।

बभूवतुर्भृशं शान्ते शुद्धे स्पन्दविवर्जिते ।

गिरौ शरदि निर्वात इव भ्रष्टाभ्रमालिके ।। ६

निर्विकल्पसमाधानाज्जहतुर्बाह्यसंविदम्।

यथा कल्पलते कान्ते पूर्वमृत्वन्तरे रसम् ।। ७

अहं जगदिति भ्रान्तिदृश्यस्यादावनुद्भवः ।

यदा ताभ्यामवगतस्यवत्यन्ताभावनात्मकः ।। ८

तदा दृश्यपिशाचोऽयमलमस्तं गतो द्वयोः ।

असत्त्वादेव चास्माकं शशशृङ्गमिवानघ ।। ९

आदावेव हि यन्नास्ति वर्तमानेऽपि तत्तथा ।

भातं वाऽभातमेवातो मृगतृष्णाम्बुवज्जगत् ।। १०

स्वभावकेवलं शान्तं स्त्रीद्वयं तद्बभूव ह ।

चन्द्रार्कादिपदार्थौघैर्दूरमुक्तमिवाम्बरम् ।। ११

तेनैव ज्ञानदेहेन चचार ज्ञप्तिदेवता ।

मानुषी त्वितरेणाशु ध्यानज्ञानानुरूपिणा ।। १२

गेहान्तरेव प्रादेशमात्रमारुह्य संविदा ।

बभूवतुश्चिदाकाशरूपिण्यौ व्योमगाकृती ।। १३

अथ ते ललने लीलालोले ललितलोचने ।

स्वभावाच्चेत्यसंवित्तेर्नभो दूरमितो गते ।। १४

तत्रस्थे वाथ चिद्वृत्त्या पुप्लुवाते नभस्थलम् ।

कोटियोजनविस्तीर्णं दूराद्दूरतरान्तरम् ।। १९

दृश्यानुसन्धाननिजस्वभावा-

दाकाशदेहे अपि ते मिथोऽत्र ।

परस्पराकारविलोकनेन

बभूवतुः स्नेहपरे वयस्ये ।। १६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलाप्रज्ञादेव्योर्ज्ञानदेहाकाशगमनं नाम त्रयोविंशः सर्गः

।। २३ ।।